ब्रह्मपुराणम् ।
"दिवारात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः ।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥"
रात्रिचराधिकारमुपक्रम्य आदिपर्व्वणि ।
"अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः ।
गर्हयन्ति जनान् सर्व्वान् बलस्थान् नृपतीनपि ॥"
तत्रार्ज्जुनस्य प्रतिवचनम् ।
"समुद्रे हिमवत्पार्श्वे नद्यामस्याञ्च दुर्म्मते ।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः ॥"
देवलः ।
"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तस्यां स्नानं न कुर्व्वीत काम्यनैमित्तिकादृते ॥"
अतएव कल्पतरुः । न नक्तं स्नायादिति बौधायनवचनं रागप्राप्तस्नानविषयम् । एवञ्च गङ्गास्नानस्य दिवारात्रिकर्त्तव्यत्वाविशेषात् तन्निमित्ततिथिविशेषस्यापि दिवारात्रिसम्बन्धित्वनाविशेषः । इति प्रायश्चित्ततत्त्वम् ॥
(रात्र्युक्तनियमाः यथा,—
"रात्रौ च भोजनं कुर्य्यात् प्रथमप्रहरान्तरे ।
किञ्चिदूनं समश्नीयात् दुर्ज्जरं तत्र वर्ज्जयेत् ॥
शरीरे जायते नित्यं देहिनः सुरतस्पृहा ।
अव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः ॥
बालेति गीयते नारी यावद्वर्षाणि षोडश ।
ततस्तु तरुणी ज्ञेया द्वात्रिंशत् वत्सरावधि ।
तदूर्द्धमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि ।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्ज्जिता ॥"
अधिरूढ़ा प्रौढ़ा ।
"निदाघशरदोर्बाला हिता विषयिणी मता ।
तरुणी शीतसमये प्रौढ़ा वर्षावसन्तयोः ।
नित्यं बाला सेव्यमाना नित्यं वर्द्धयते बलम् ।
तरुणी ह्रासयेच्छक्तिं प्रौढ़ोत्पादयते जराम् ॥
सद्यो मांसं नवान्नं बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकं स्नानं सद्यः प्राणकराणि षट् ॥
पूतिमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥"
प्राणशब्दोऽत्र बलवाचकः । बालार्कः कन्यार्कः ।
"वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् ।
वयोऽधिकां स्त्रियं गत्वा तरुणः स्थविरायते ॥
आयुष्मन्तो मन्दजरा वपुर्व्वर्णबलान्विताः ।
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः ॥
सेवेत कामतः कामं बलाद्वाजीकृतो हि मे ।
प्रकामन्तु निषेवेत मैथुनं शिशिरागमे ॥
त्र्यहाद्वसन्तशरदोः पक्षाद्वर्षनिदाघयोः ॥"
सुश्रुतस्तु ।
"त्रिभिस्त्रिभिरहोभिर्हि समेयात् प्रमदां नरः ।
सर्व्वेष्वृतुषु घर्म्मेषु पक्षात् पक्षाद्व्रजेद्बुधः ॥"
समेयात् सङ्गच्छेत् घर्म्मे ग्रीष्मे ।
"शीते रात्रौ दिवा ग्रीष्मे वसन्ते तु दिवानिशि ।
वर्षासु वारिदध्वाने शरत्सु सरसः स्मरः ॥
वर्ज्जयेत् पुरुषो नारीं सन्ध्ययोर्न च पर्व्वसु ।
गोसर्गे चार्द्धरात्रे च तथा मध्यदिनेऽपि च ॥
विहारं भार्य्यया कुर्य्याद्देशेऽतिशयसंवृते ।
रम्ये श्रवाङ्गनागाने सुगन्धे सुखमारुते ॥
देशे गुरुजनासन्ने विवृतेऽतिचपाकरे ।
श्रूयमाणे यथाहेतुवचने न रमेत ना ॥
स्नातश्चन्दनलिप्ताङ्गः सुगन्धः सुमनोऽन्वितः ॥
भुक्तवृष्यः सुवसनः सुवेशः समलङ्कृतः ।
ताम्बूलवदनः पत्न्यामनुरक्तोऽधिकः स्मरः ॥
पुत्त्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ।
अत्याशितोऽधृतिः क्षुद्वान् सव्यथाङ्गः पिपासितः ॥
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् ॥"
रोगी मैथुनसंवर्द्धनीयरोगयुक्तः ।
"भार्य्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम् ।
अतिकामोऽभिकामान्तु हृष्टो हृष्टामलङ्कृताम् ॥
सेवेत प्रमदां युक्त्या वाजीकरणबृंहितः ।
रजस्वलामकामाञ्च मलिनामप्रियान्तथा ॥
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् ।
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिरोगसमन्विताम् ॥
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि ॥
नाभिगच्छेत् पुमान्नारीं भूरिवैगुण्यशङ्कया ॥"
"स्नानं शर्करं क्षीरं भक्ष्यमैक्षवसंस्कृतम् ।
वातो मांसरसः स्वप्नः सुरतान्ते हिता अमी ॥
शूलकासज्वरश्वासकार्श्यपाण्ड्वामयक्षयः ।
अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः ॥
रात्रौ जागरणं रूक्षं कफदोषविषार्त्तिजित् ।
निद्रा तु सेविता काले धातुसाम्यमतन्द्रितम् ॥
पुष्टिवर्णबलोत्साहं वह्निदीप्तिं करोति च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तद्वैदिकपर्य्यायः । श्यावी १ क्षपा २ शर्व्वरी ३ अक्तुः ४ ऊर्म्या ५ राम्या ६ यम्या ७ नम्या ८ दोषा ९ नक्ता १० तमः ११ रजः १२ असिक्नी १३ पयस्वती १४ तमस्वती १५ घृताची १६ शिरिणा १७ मोकी १८ शोकी १९ ऊधः २० पयः २१ हिमा २२ वस्वी २३ । इति त्रयोविंशती रात्रिनामानि । इति वैदनिघण्टौ । १ । ७ ॥ (क्रौञ्चद्वीपस्थनदीविशेषः । यथा, मात्स्ये । १२२ । ८७ ।
"श्वेताक्षेव नद्यस्तु प्रतिवर्षं गताः शुभाः ।
गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ॥")

रात्रिकरः, पुं, (रात्रिं करोतीति । कृ + टः ।) चन्द्रः । इति हेमचन्द्रे निशाकरशब्ददर्शनात् ॥ (कर्पूरः । इत्यमरः । २ । ६ । १३० ॥)

रात्रिचरः, पुं, (रात्रौ चरतीति । "चरेष्टः ।" ३।२।१६। इति टः । "रात्रेः कृति विभाषा ।" ६ । ३ । ७२ । इति पक्षे मुमभावः ।) राक्षसः । इत्यमरः । १।१।६३ ॥ रात्रौ गमनकर्त्तरि, त्रि ॥

रात्रिचरी, स्त्री, (रात्रिचर + टित्वात् ङीप् ।) राक्षसी । यथा, भट्टिः । २ । २३ ।
"तं विप्रदर्शं कृतघातयत्नां
यान्तं वने रात्रिचरी डुढौके ।
जिघांसवेदं घृतभासुरास्त्रं
तां ताड़काख्यां निजघान रामः ॥"

रात्रिजलं, क्ली, (रात्रेर्जलम् ।) कुज्झटिका । इति शब्दमाला ॥

रात्रिजागरः, पुं, (रात्रौ जागर्त्तीति । जागृ + अच् ।) कुक्कुरः । इति हेमचन्द्रः ॥ रात्रौ जागरणकर्त्तरि, त्रि ॥

रात्रिजागरदः, पुं, (रात्रौ जागरं जागरणं ददातीति । दा + कः ।) मशकः । इति राजनिर्घण्टः ॥

रात्रिञ्चरः, पुं, (रात्रौ चरतीति । चर् + टः । "रात्रेः कृति विभाषा ।" ६।३।७२। इति मुम् ।) राक्षसः । इत्यमरः । १।१।६३ ॥ (स्त्रियां ङीप् । रात्रिञ्चरी ॥) रात्रौ गमनकर्त्तरि, त्रि ॥

रात्रिपुष्पं, क्ली, (रात्रौ पुष्प्यति विकाशते इति । पुष्प् + अच् ।) उत्पलम् । इति राजनिर्घण्टः ॥

रात्रिमटः, पुं, (रात्रौ अटतीति । अट् + अच् । "रात्रेः कृति विभाषा ।" ६ । ३ । ७२ । इति मुम् ।) राक्षसः । इति त्रिकाण्डशेषः ॥ रात्रौ गमनकर्त्तरि, त्रि ॥

रात्रिमणिः, पुं, (रात्रेर्मणिरिव ।) चन्द्रः । इति हारावली । १३ ॥

रात्रिवासः, [स्] क्ली, (रात्रेर्वासो वस्त्रमिव ।) अन्धकारः । इति शब्दमाला ॥ रात्रौ शयनकालीनपरिधेयवस्त्रम् । यथा । ब्राह्मे मुहूर्त्ते उत्थाय शुक्लवासः रात्रिवासस्त्यक्त्वा शिरसि सहस्रदलकमलावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशरूपं स्ववामस्थितरक्तशक्त्या सुप्रकाशरूपया सहितं गुरुं विभाव्य मानसोपचारैराराध्य नमस्कुर्य्यात् । इति तन्त्रसारः ॥ अपि च ।
"शयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुवेशञ्च वर्ज्जयेत् शुष्कभोजनम् ॥"
इति कर्म्मोचरितम् ॥

रात्रिविगमः, पुं, (रात्रेर्विगमो यत्र ।) प्रभातम् । इति शब्दमाला ॥

रात्रिविश्लेषगामी, [न्] पुं, (रात्रौ विश्लेषं विच्छेदं गच्छतीति । गम् + णिनिः ।) चक्रवाकः । इति राजनिर्घण्टः ॥

रात्रिवेदः, पुं, (रात्रिं रात्रिशेषं वेदयति रवेणेति । विद् + णिच् + अच् ।) कुक्कुटः । इति शब्दरत्नावली ॥

रात्रिवेदी, [न्] पुं, (रात्रिं रात्रिशेषं वेदयति स्वरेणेति । रात्रि + विद् + णिच् + णिनिः ।) कुक्कुटः । इति त्रिकाण्डशेषः ॥

रात्रिहासः, पुं, (रात्रेर्हास इव शुभ्रत्वात् । रात्रौ हासो विकाशो यस्य इति वा ।) श्वेतोत्पलम् । इति शब्दरत्नावली ॥

रात्रिहिण्डकः, पुं, (रात्रौ हिण्डति अन्तःपुरमध्ये भ्रमतीति । हिण्ड गतौ + ण्वुल् ।) अन्तःपुररक्षकः । इति शब्दरत्नावली ॥

रात्री, स्त्री, (रात्रि + कृदिकारादिति ङीष् ।) निशा । इत्यमरटीकायां भरतः ॥ (यथा, ऋग्वेदे । १० । १२७ । १ ।